नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 28
No. of Printed Pages – 8

# SS-12-Sanskrit Sah.

## संस्कृत साहित्यम्

### उच्च माध्यमिक परीक्षा, 2021

**समय : 3¼ (सपाद होरात्रयम्)**

**पूर्णाङ्क : 80**

OFFICE COPY

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकस्य प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकस्य प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रश्नानां अंकभाराणि निम्नानुसाराणि सन्ति:

| खण्ड | प्रश्नों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड–अ (A) | 1 (i से x), 2 से 11 = 20 | 1 | 20 |
| खण्ड–ब (B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड–स (C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड–द (D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड–य (E) | 26 से 28 = 3 | 6 | 18 |

**खण्ड – अ (A)**

1. अधोलिखितप्रश्नानाम् उत्तरस्य उचितं क्रमाक्षरं स्व उत्तर पुस्तिकायां लिखतु : **(1 × 10 = 10)**

(i) "सं नो मनांसि जानताम्" इत्यत्र "मनांसि" इति पदस्य कोऽर्थः ? **(1)**

(अ) चित्तेषु (ब) भावेषु

(स) ज्ञानेषु (द) मानवेषु

(ii) कवीनां गणना–प्रसङ्गे कनिष्ठिकाधिष्ठितः कः ? **(1)**

(अ) भवभूतिः (ब) कालिदासः

(स) श्रीहर्षः (द) माघः

OFFICE COPY

(iii) डॉ हरिरामआचार्येण "मधुच्छन्दा" इति गीतिकाव्यस्य कृते कः पुरस्कारः प्राप्तः ? **(1)**

(अ) मीरापुरस्कारः (ब) कविशिरोमणिपुरस्कारः

(स) माघ–पुरस्कारः (द) अर्जुनपुरस्कारः

(iv) महिलारोप्यराज्ञः अमरशक्तेः कति पुत्राः आसन् ? **(1)**

(अ) चत्वारः (ब) त्रयः

(स) पञ्च (द) षट्

(v) माघस्य पितुः नाम किम् आसीत् ? **(1)**

(अ) दत्तकः (ब) भोजः

(स) सुप्रभदेवः (द) विक्रमः

(vi) "मेघदूतपीयूषम्" पाठानुसारेण चातकेभ्यः जलं कः ददाति ? **(1)**

(अ) मेघः (ब) यक्षः

(स) इन्द्रः (द) कुबेरः

(vii) श्रीमद्भागवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ? (1)

(अ) भीष्म पर्वणि (ब) वन पर्वणि

(स) सभा पर्वणि (द) विराट् पर्वणि

(viii) अपरिणामोपशमो दारुणो कः ? (1)

(अ) लक्ष्मीमदः (ब) यौवनमदः

(स) राजमदः (द) पुत्रमदः

(ix) "ॐ शं नो मित्रः वरुणः" इति मन्त्रः कस्मात् वेदात् उद्धृतोऽस्ति ? (1)

(अ) ऋग्वेदात् (ब) यजुर्वेदात्

(स) सामवेदात् (द) अथर्ववेदात्

(x) कुसुम-सदृशं आशाबन्धः केषां भवति ? (1)

(अ) पुरुषाणाम् (ब) अङ्गनानाम्

(स) यक्षाणाम् (द) मेघानाम्

OFFICE COPY

प्रश्न संख्या **2** तः **5** पर्यन्तं रेखांकित-पदानि आधृत्य प्रश्न-निर्माणं कृत्वा एक-पंक्त्याम् उत्तरं प्रदत ।

2. मानवाः सर्वत्र विजयं कामयन्ते । (1)

3. नन्दिनी एकदा हिमालय गुहायां प्रविष्टवती । (1)

4. स यत्प्रमाणं कुरुते लोकः तदनुवर्तते । (1)

5. वस्तुतः गुरोः ज्ञानम् अमूल्यं भवति । (1)

प्रश्न संख्या **6** तः **8** पर्यन्तं अधोलिखितपद्यांशेषु प्रयुक्त-अलंकारस्य नामोल्लेखं कुरुत ।

6. नव पलाश पलाश वनं पुरः (1)

7. ततो मृगेन्द्रस्य मृगेन्द्रगामी (1)

8. स्नपयति हृदयेशं निष्यन्दिनी ते । (1)
धवलबहल – मुग्धादुग्ध कुल्येव दृष्टिः ।।

प्रश्न संख्या 9 तः 11 पर्यन्तं रिक्तस्थानं पूरयित्वा स्व उत्तर पुस्तिकायाम् उत्तरं लिखत ।

9. नियतं कुरु _____ त्वं कर्म ज्यायो ह्यकर्मणः । (1)

10. महीयांसः _____ मितभाषिणः । (1)

11. अद्य मातृवन्दना _____ गीयताम् । (1)

## खण्ड – ब (B)

निम्नलिखितप्रश्नानां संस्कृतभाषायाम् उत्तरं लिखत ।

12. 'मुद्राराक्षसम्' इति नाटकं केन विरचितम् ? (2)

13. पं अम्बिकादत्तव्यासस्य जन्म कुत्र अभवत् ? (2)

14. वेदेषु प्राचीनतमः वेदः कः ? (2)

15. रघुवंशमहाकाव्यस्य रचयिता कः ? (2)

16. माघस्य काव्ये कति गुणाः सन्ति ? (2)

17. "बुद्धिमान् स्वकार्यं नीत्या साधयति ।" इत्यत्र 'साधयति' इति क्रियायाः कर्त्ता कः अस्ति ? (2)

OFFICE COPY

18. अधोलिखित–श्लोकस्य अन्वयसहितम् अर्थं हिन्द्यां संस्कृते वा लिखत । (2)
"भारतीयशो भृशं समस्त दिक्षु चीयताम् ।
स्वतन्त्रतामृतं सुपर्णकैः दिवः समाहृतम् ।।
हुतात्मभिः समर्पितं प्रभारतं सु–भारतम् ।
न तत्ररक्तमण्डनम् भवेन्न शान्ति खण्डनम् ।।"

19. अधोलिखितस्य कस्यचित् एकस्य अलंकारस्य लक्षणोदाहरणे लिखत । (2)
रूपकम् अथवा अनुप्रासः

## खण्ड – स (C)

20. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत । **(4)**

गुरुपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानं, अनुपजात-पलिता दिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम् । असुवर्णविरचनम् अग्राम्यं कर्णाभरणं, अतीत ज्योतिरालोकः नोद्वेगकरः प्रजागरः । विशेषेण तु राज्ञाम् । विरलाः हि तेषामुपदेष्टारः ।

(i) पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानं किम् ? **(1)**

(ii) केषाभ् उपदेष्टारः विरलाः ? **(1)**

(iii) गुरुपदेशः कीदृशः प्रजागरः ? **(1)**

(iv) "विशेषेण तु राज्ञाम्" इत्यत्र अव्ययपदं किम् ? **(1)**

**अथवा**

द्वाविंशे दिने सा मुनिहोमधेनुः आत्मानुचरस्य भावं जिज्ञासमाना हिमालयगुहायां प्रविष्टवती । नन्दिनी मनसापि हिंस्रैः न कदापि दमनीया इत्यवगत्य स राजा अद्रिशोभादर्शने तत्परोऽभवत् । तदन्तरे अलक्षिताभ्युत्पतनः मृगेन्द्रैकः तां नन्दिनीं बलादाकृष्य वधाय प्रवृत्तः ।

(i) मुनिहोमधेनुः किमर्थं हिमालयगुहायां प्रविष्टवती ? **(1)**

(ii) सः राजा किम् दर्शने तत्परोऽभवत् ? **(1)**

(iii) कः तां नन्दिनीं बलादाकृष्य वधाय प्रवृत्तः ? **(2)**

OFFICE COPY

21. अधोलिखितपद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(4)**

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः,
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।

(i) स्वाधिकारात् प्रमत्तः कः ? **(1)**

(ii) यक्षः कुत्र वसति ? **(1)**

(iii) स्निग्धछायातरुषु वसतिम् । इत्यत्र विशेषणपदं किम् ? **(1)**

(iv) यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु । इत्यत्र क्रियापदं किम् ? **(1)**

**अथवा**

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोक संग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ।।

(i) जनकादयः कर्मणा एव किम् आस्थिताः ? **(1)**

(ii) लोकसंग्रहः केन प्रकारेण करणीयः ? **(1)**

(iii) 'कर्मणैव हि संसिद्धिः' इत्यत्र अव्ययपदं किम् । **(1)**

(iv) 'सम्पश्यन्कर्तुमर्हसि' इत्यत्र क्रियापदं किम् । **(1)**

22. अधोलिखितम् अपठितं गद्यांशं पठित्वा उत्तराणि लिखत । **(4)**

संस्कृतभाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति । प्राचीनकाले सर्वे भारतीया: संस्कृतभाषायां एव व्यवहारं कुर्वन्ति स्म । कालान्तरे विविधा: प्रान्तीया: भाषा: प्रचलिता: अभवन् किन्तु संस्कृतस्य महत्त्वम् अद्यापि अक्षुण्णं वर्तते । सर्वे प्राचीनग्रन्था: चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति । संस्कृतभाषा भारतराष्ट्रस्य एकताया: आधार: अस्ति ।

(i) अस्माकं देशस्य प्राचीनतमा भाषा का ? (एक पदेन उत्तरम् ।) **(1)**

(ii) भारतराष्ट्रस्य एकताया: आधार: क: ? (पूर्ण वाक्येन) **(1)**

(iii) संस्कृतभाषाया: व्यवहारं कदा कुर्वन्ति स्म ? **(1)**

(iv) "विविधा: प्रान्तीया: भाषा: प्रचलिता: अभवन् ।" इत्यत्र क्रियापदं किम् ? **(1)**

**अथवा**

भारतीयधर्मस्य मूलाधार: अहिंसा एव अस्ति । गीतायां श्रीकृष्णेन देवी–सम्पत्सु अहिंसाया: गणना प्रथमे स्थाने कृता । जैनधर्म:, बौद्धधर्म: च उभौ अहिंसाप्रधानौ एव । महात्मागांधी अपि अंहिंसाया: पालने बलं दत्तवान् । तस्य अयं विश्वास: आसीत् यद् अहिंसकस्य सम्मुखे हिंसक: अपि स्वस्य हिंसावृत्तिं परित्यजति ।

(i) कस्य मूलाधार: अहिंसा भवति ? (एकपदेन उत्तरत) **(1)**

(ii) कौ अहिंसाप्रधानौ धर्मौ स्त: ? (पूर्णवाक्येन उत्तरत) **(1)**

(iii) कुत्र अहिंसाया: गणना प्रथमे स्थाने कृता ? **(1)**

(iv) अहिंसामार्ग: केन महापुरुषेण स्वीकृत: ? **(1)**

23. अधोलिखितम् अपठितं गद्यांशं पठित्वा उत्तराणि लिखत । **(4)**

सत्यस्य पालनार्थमेव महाराजो दशरथ: प्रियं पुत्रं रामं वनं प्रैषयत् । राजा हरिश्चन्द्र: सत्यपालनार्थमेव सर्वाणि दु:खानि असहत् । युधिष्ठिर: सत्यभाषणस्य प्रभावादेव विजयमलभत् । महात्मा–गांधिमहोदय: सत्यस्यैव सदा शिक्षामददात् । भारतस्यं राजचिह्नेऽपि 'सत्यमेव जयते' इत्यादरेण उल्लिख्यते ।

(i) सत्यभाषणस्य प्रभावादेव क: विजयमलभत् ? (एक पदेन) **(1)**

(ii) 'सत्यमेव जयते' इत्यादरेण कुत्र उल्लिख्यते ? **(1)**

(iii) महाराज: दशरथ: प्रियं पुत्रं रामं वनं किमर्थं प्रैषयत् ? **(1)**

(iv) "आत्मज:" इति पदस्य समानार्थकं पदम् अनुच्छेदात् चित्वा लिखत । **(1)**

**अथवा**

आसीद् बंगदेशे बोपदेव: नाम कश्चिद् बालक: । स विद्यालये पाठ्यविषयाणाम् अवबोधने स्मरणे च नितान्तम् असमर्थ: आसीत् । असौ प्राय: चिन्तयति स्म यत् अन्ये छात्रा: सर्वान् विषयान् शीघ्रं अवगच्छन्ति, लिखन्ति स्मरन्ति च किन्तु मन्दबुद्धि: अहं तान् न अवगच्छामि किमर्थम् अहम् अत्र समयं वृथा नाशयामि ।

(i) बोपदेव: नाम बालक: कुत्र निवसति स्म ? **(1)**

(ii) बोपदेव: विद्यालये किम् कर्त्तुम् असमर्थ: आसीत् ? **(1)**

(iii) "अहम् अत्र समयं वृथा नाशयामि ।" इत्यत्र क्रियापदं किम् ? **(1)**

(iv) पाठशालायाम् इत्यस्य समानार्थकपदं विद्यते । **(1)**

OFFICE COPY

## खण्ड – द (D)

24. (अ) अधोलिखित छन्दसः लक्षणोदाहरणे लिखत । **(5)**

द्रुतविलम्बितम् **(3)**

**अथवा**

शिखरिणी

(ब) अधोलिखित-पद्यांशस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत ।

ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । **(2)**

**अथवा**

पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ।

25. अधोलिखित रेखांकितपदेषु प्रयुक्तविभक्तेः नामोल्लेखं कृत्वा तस्य सूत्रं चापि लिखत ।

(क) गोपालः गां दुग्धं दोग्धि । **(1)**

(ख) नृपः सिंहासनम् अध्यास्ते । **(1)**

(ग) नेत्रेण काणः । **(1)**

(घ) देवदत्तः यज्ञदत्ताय शतं धारयति । **(1)**

(ङ) कामात् क्रोधः जायते । **(1)**

**अथवा**

(क) रामाय नमः । **(1)**

(ख) कृष्णस्य कृतिः । **(1)**

(ग) सः जटाभिः तापसः प्रतीयते । **(1)**

(घ) गवां गोषु वा कृष्णा बहु क्षीरा । **(1)**

(ङ) ग्रामं परितः क्षेत्राणि सन्ति । **(1)**

OFFICE COPY

## खण्ड – य (E)

26. (क) अधोलिखितयोः कयोश्चित् **द्वयोः** पदयोः सूत्रोल्लेखपूर्वकं संधिविच्छेदं कुरुत । **(1½ + 1½ = 3)**

(i) लाकृतिः (ii) गव्यम्

(iii) उपैति (iv) दैत्यारिः

(ख) अधोलिखितयोः कयोश्चित् **द्वयोः** पदयोः सूत्रोल्लेखपूर्वकं संधिं कुरुत । **(1½ + 1½ = 3)**

(i) हरे + अव (ii) त्र + एजते

(iii) हित + उपदेशः (iv) महा + औषधिः

27. प्रदत्तशब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत । **(6)**

महाकविः कालिदासः, श्रेष्ठकविः, उपमा, सप्तकृतयः, कलापक्षः, भावपक्षः, वैदर्भीरीतिः, पुराकवीनां, महाकाव्यं, खण्डकाव्यं, नाटकं, विश्व साहित्ये स्थानम् ।

**अथवा**

क्रमरहितानि वाक्यानि समुचितं क्रमानुसारं लिखत **(1 × 6 = 6)**

(क) अतः एकदा काकः स्व मित्रस्य शृगालस्य समीपं गत्वा उक्तवान् भो मित्र ! स : कृष्णसर्पः कथं मारणीयः उपायं सूचयतु इति ।

(ख) तत्र एकः काकः पत्न्या सह वसति स्म ।

(ग) एकस्मिन् वने कश्चन महावृक्षः आसीत् ।

(घ) यदा काकस्य पत्नी प्रसूता भवति तदा कृष्णसर्पः तस्याः अण्डानि खादति स्म ।

(ङ) तस्य एव वृक्षस्य कोटरे एकः कृष्णसर्पः अपि वसति स्म ।

(च) एतेन दुःखेन काकः तस्य च पत्नी महादुःखम् अनुभवतः स्म ।

28. अधोलिखितवाक्येषु केषांचित् षड्वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत । **(6 × 1 = 6)**

(i) जो जैसा बीज बोता है वैसा ही फल प्राप्त करता है ।

(ii) विद्यालय के समीप देवालय है ।

(iii) भक्त को रामायण अच्छी लगती है ।

(iv) छात्र शिक्षक से पढ़ता है ।

(v) बड़ों का अनुकरण करो ।

(vi) उठो जागो लक्ष्य प्राप्ति तक मत रुको ।

(vii) पेड़ से पत्ता गिरता है ।

(viii) पढ़ने के कारण वह यहाँ रहता है ।

(ix) मेरे पिताजी का नाम भगवान् है ।

(x) राम के वन चले जाने पर दशरथ ने प्राण त्याग दिए ।

---

OFFICE COPY